**International Journal of Multidisciplinary Research and Development**
**Online ISSN: 2349-4182, Print ISSN: 2349-5979, Impact Factor: RJIF 5.72**
**www.allsubjectjournal.com**
**Volume 3; Issue 11; November 2016; Page No. 204-207**

# प्राच्यनैयायिकाभिमत: द्वितीयार्थविचार:

**श्याम सुन्दर शर्मा**

शोधच्छात्र:, संस्कृत-विभाग:, देहली-विश्वविद्यालय:, दिल्ली

## Abstract

महर्षिपाणिनिना अष्टाध्याय्या: रचना कृता। तत्र कारकव्यवस्था बहुव्यवस्थितरीत्या वैज्ञानिकपद्धतिमाधृत्य प्रकल्पिता। सा च कारकव्यवस्था एव समेषां संस्कृतवाक्यानां निर्माणे प्रामुख्येन साक्षात्कारणम्। तत्रैव कर्मकारकस्यारम्भे महर्षि: पाणिनि: 'कर्मणि द्वितीया' इति विधिसूत्रं विनिर्माति। अस्य द्वितीयाविभक्तिविधायकसूत्रस्य प्राच्यनैयायिकसिद्धान्तानामानुकूल्यं विश्लेषणमस्मिन् शोधपत्रे विलिखितम्। सूत्रस्थ 'कर्म'पदस्य तात्पर्यं 'कर्म' उत वा 'कर्मत्वमि'तिविषयविवेचनपुरस्सरं पूर्वोत्तरपक्षयोरापत्तिसमाधानपूर्वकं विवेचनमत्र शोधपत्ररचनाकर्त्रा कृतम्।

**Keywords:** कर्मणि द्वितीया, व्युत्पत्तिवाद:, व्याकरणशास्त्रम्, न्यायशास्त्रम्, कारकम्, पाणिनि:, गदाधरभट्टाचार्य:

### 1. प्रस्तावना

यद्यपि प्राचीनन्यायशास्त्रम्प्रमेयप्रधानम्, नव्यन्यायशास्त्रञ्च प्रमाणप्रधानमिति प्रोच्यते शोधकर्तृभि:। तथाप्यत्र भाषा तथा चैतस्या: संरचनाविषये विशेषरूपेऽन्वाख्यानन्न प्रस्तुतम्। तदपि परवर्ती नैयायिकेषु भवानन्दस्य (षोडशशताब्द्याम्) कारकचक्रे, रूद्ररामस्य (षोडशशताब्द्याम्) कारकव्यूहे, जगदीशतर्कालङ्कारस्य (सप्तदशशताब्द्याम्) शब्दशक्तिप्रकाशिकायां, गदाधरभट्टाचार्यस्य (सप्तदशशताब्द्याम्) व्युत्पत्तिवादे, जयरामस्य (सप्तदशशताब्द्याम्) कारकवादे, गोकुलनाथस्य (सप्तदशशताब्द्याम्) पदवाक्यरत्नाकरे, गिरिधरस्य (सप्तदशशताब्द्याम्) विभक्त्यर्थनिर्णय इत्यादिषु कृतिषु बहुश: भाषासंरचनाविषये सारगर्भितं विवेचनं समुपलभ्यते।

नैयायिकगदाधरभट्टाचार्येण सप्तदशशताब्द्यान्यायशास्त्रीयग्रन्था: विरचिता:। तेष्वन्यतम: 'व्युत्पत्तिवाद:', अत्र विशेषत: संस्कृतव्याकरणस्य कारकप्रणालीमभिलक्ष्य नव्यन्यायभाषाशैल्यामद्भुतमतीवविस्तृतञ्च विवेचनमस्माकम्पुरत: प्रस्तुतम्। ग्रन्थेऽस्मिन् गदाधरभट्टाचार्येण प्राचीननैयायिकानां सिद्धान्तानुकूला व्याख्या 'कर्मणि द्वितीया' इति सूत्रस्य कृता विद्यते। एषा च व्याख्या गदाधरभट्टाचार्येण पूर्वपक्षस्य स्थापनाक्रमे विश्लेषिता। अत: द्वितीयार्थस्य सन्दर्भे प्राच्यनैयायिकानां मतं सुष्ठुतया अवगमनाय ग्रन्थोऽयम् अत्यधिकं महत्त्वपूर्णं स्थानं भजते।

### 2. भूमिका

कर्म इत्युक्ते किम्? 'कर्म कुरू' इत्यादिस्थले व्यवहारात् कर्मशब्द: तत्तत्कर्तव्यपारायणत्वेन पारिभाषिक एतत्प्रयुक्तं लौकिकं कर्म उत वा उत्क्षेपणादिकं नैयायिकं कर्म उत वा अन्यत् ? तच्च किमिति प्रश्ने महर्षिपाणिनि: परिभाषयन्नाह व्याकरणशास्त्रे कर्मपदं पारिभाषिकं विद्यते। कर्मसंज्ञा विधायकेषु शास्त्रेषु तावत् प्रामुख्यं भजते 'कर्तुरिप्सिततं कर्म' (पा. सू. 01-04-49) कर्तु: क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं भवति।

### 3. कर्मकारकस्य सर्वविभक्तिकत्वम्

आचार्यपाणिनिना कृत: अष्टाध्यायीग्रन्थस्तत्र 'कारके'[1] इति सूत्रस्याधिकारे 'कर्मणि द्वितीया'[2] इत्यनुशासनसूत्रं पठितम्। एतेन विहिता द्वितीयाविभक्ति: कर्मकारकस्य बोधिका विभक्ति: भवति। वस्तुतस्तु द्वितीयाविभक्त्या प्रामुख्येन कर्मकारकस्य बोधो जायते। गौणत्वेन च प्राय: सर्वविभक्तिभि: कर्मकारकस्य बोधो भवति यतोहि विवक्षात: कारकाणि भवन्तीति वैयाकरणभाष्यकार: पतञ्जलि:। वक्तुमिच्छा विवक्षा। । तथा हि -

- 'चैत्रेण अजा ग्रामं नीयते' इत्यत्र वाक्ये 'अजा' इति प्रथमान्तपदं तश्च 'अकथितं च'[3] इति पाणिनिसूत्रेण कर्मसंज्ञकं भवति। अतोऽत्र अजानिष्ठकर्मत्वं प्रथमाविभक्तिना कथ्यते।
- 'क्रियार्थोपपदस्य च कर्मणि स्थानिन:'[4] इति पाणिनेरनुशासनात् 'फलेभ्यो याति' इत्यत्र विहितचतुर्थीविभक्या कर्मकारकं (फलान्याहर्तुम्) बोध्यते।
- 'भुव: प्रभव:'[5] इति सूत्रस्थवार्तिकेन 'ल्यब्लोपे कर्मण्यधिकरणे च'[6] इत्यनेन 'प्रासादात् प्रक्षते' इत्यस्मिन् स्थले विहितपञ्चमीविभक्त्या कर्मकारकस्य (प्रासादमारूह्य) बोधो जायते।
- 'कर्तृकर्मणो: कृति'[7] इति सूत्रेण 'भूमेर्गमनं, न महीरुहस्य' इत्यस्मिन् वाक्ये विहितषष्ठीविभक्या कर्मकारकस्य (भूमिकर्मकं, महीरुहकर्मकञ्च) बोधो विधीयते। एतस्माद्धेतोरियं षष्ठी कारकविभक्ति: भवति। वस्तुतस्तु षष्ठीविभक्ति: सर्वदा कारकविभक्तिरेव। परञ्च 'संबन्धस्तावत्' कारकत्वेन न व्यवह्रियते। यदा षष्ठीविभक्त्या उत वा अन्यविभक्त्या संबन्धस्य बोध:

---

1 पाणिन्याष्टाध्यायी, सूत्रसंख्या 01/04/23.
2 पाणिन्याष्टाध्यायी, सूत्रसंख्या 02/03/02.
3 पाणिन्याष्टाध्यायी, सूत्रसंख्या 01/04/51.
4 पाणिन्याष्टाध्यायी, सूत्रसंख्या 02/03/14.
5 पाणिन्याष्टाध्यायी, सूत्रसंख्या 01/04/31.
6 वार्तिकसंख्या 148.
7 पाणिन्याष्टाध्यायी, सूत्रसंख्या 02/03/65.

विधीयते तदा सा षष्ठीविभक्ति उत वा अन्या विभक्ति: कारकविभक्ति: नैव भवति। परञ्च कर्तृकर्मादिकारकानां बोधिका षष्ठीविभक्ति: कारकविभक्तिरेव भवतीति वृद्धा:।

- 'सप्तम्यधिकरणे च'[8] इति पाणिनिसूत्रस्थेन 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्'[9] वार्तिकेन 'अधीती व्याकरणे' इत्यस्मिन् वाक्ये विहितसप्तमीविभक्त्या कर्मकारकस्य (व्याकरणम्) बोधो जायते।

### 4. द्वितीयाविभक्ते: सर्वकारकत्वम्

द्वितीयाविभक्ति: प्रामुख्येन कर्मकारकस्य, गौणत्वेन प्राय: सर्वकारकाणां बोधिका

- 'कर्मणि द्वितीया' इत्यनेन पाणिनिसूत्रेण 'ग्रामं गच्छति' इत्यादिस्थले विहितद्वितीयाविभक्ति: कर्मकारकस्य बोधिका भवति।
- 'अकथितं च' इत्यनेन पाणिनिसूत्रेण 'तण्डुलान् ओदनं पचति' इत्यादिस्थले 'तण्डुलान्' इत्यत्र विहितद्वितीयाविभक्ति: करणकारकस्य (तण्डुलै:) बोधिका भवति।
- 'क्रुधद्रुहोरुपसृष्टयो: कर्म'[10] इत्यनेन पाणिनिसूत्रेण 'क्रूरम् अभिक्रुध्यति' इत्यत्र विहितद्वितीयाविभक्त्या संप्रदानकारकं (क्रूराय) बोध्यते।
- 'अकथितं च' इत्यनेन पाणिनिसूत्रेण 'चैत्र: गां क्षीरं दोग्धि' इत्यादि वाक्ये 'गाम्' इत्यत्र विहितद्वितीयाविभक्त्या अपादानकारकं (गो:) बोध्यते।
- 'अन्तरान्तरेण युक्ते'[11] इत्यनेन पाणिनिसूत्रेण 'अन्तरा त्वां मां हरि:' इत्यादि वाक्ये विहितद्वितीयाविभक्ति: अवधित्वरूपसंबन्धस्य बोधिका[12] तस्माद् द्वितीयाविभक्ते: न कारकत्वम्। वस्तुतस्तु उदाहरणोऽयम् उपपदविभक्ते: विद्यते।
- 'अधिशीङ्स्थासां कर्म'[13] इत्यनेन पाणिनिसूत्रेण 'वैकुण्ठम् अधिशेते' इत्यादि वाक्ये विहितद्वितीयाविभक्त्या अधिकरणकारकं (वैकुण्ठे) बोध्यते।

### 5. 'कर्मणि द्वितीया' सूत्रस्थ 'कर्म'पदस्य[14] तात्पर्यम् 'कर्मत्वम्'

गदाधरभट्टाचार्य: व्युत्पत्तिवादस्य कर्मप्रकरणस्यादौ 'कर्मणि द्वितीया' इत्यनुशासनव्याख्यावसरे कथयति यत् सूत्रस्थं 'कर्मणि' इत्येवं पदं भावप्रधाननिर्देशात्मकं तेन कर्मपदं धर्ममात्रपरत्वात् कर्मवृत्तिधर्म'कर्मत्व'स्य बोधक:। मात्रशब्दग्रहणेन कर्मत्वस्याश्रयस्य कर्मण: न तावत् बोध:[15]। तथा च अमरकोषस्य एकस्मिन् वाक्ये 'गुणे शुक्लादय: पुंसि, गुणिलिङ्गास्तु तद्वति' इत्यादौ 'गुणवाचका: शुक्लादय: पुंसि'[16] इत्यर्थस्याभीष्टत्वात् यथा 'गुणे' सप्तमीविभक्ते: वाचकार्थकत्वं[17] तथैव 'कर्मणि' इत्यत्रापि सप्तमीविभक्ते: वाचकत्वमर्थ:। प्रकृत्यर्थकर्मत्वप्रत्ययार्थवाचकत्वयोर्मध्ये निरूप्यनिरूपकभावसंबन्धस्तेन 'कर्मत्वनिरूपितवाचकता' अयञ्च 'कर्मणि'पदस्यार्थ:। कर्मत्वनिरूपितवाचकताया: आश्रयत्वसंबन्धेन सूत्रस्थे अपरस्मिन् पदे 'द्वितीया'याम् अन्वय:। सर्वमाहत्य ''कर्मत्वनिरूपितवाचकताश्रयवती द्वितीया'' संक्षेपेण कथ्यते चेत् 'कर्मत्व (फल) वाचिका द्वितीया' अथवा 'द्वितीयावाच्यं कर्मत्वम्' अयमेव सूत्रार्थो भवति।

ननु कर्मण: द्वितीयार्थत्वेऽपि कर्मत्वमेव शक्यतावच्छेदकमिति प्रकारतया कर्मत्वस्यापि द्वितीयार्थत्वमिति सुतरां सिद्धम्। कथं तर्हि पूर्वं प्रदर्शित: प्रक्रम:? मैवम्, तथा सति कर्मत्वस्य मुख्यार्थत्वाभावत्। मुख्यार्थत्वञ्च वृत्तिगृहमुख्यविशेष्यत्वम्, तच्च कर्मण: द्वितीयार्थत्वे कर्मत्वमेव शक्यतावच्छेदकमिति प्रकारतया कर्मत्वस्यापि द्वितीयार्थत्वं नास्तीति[18]।

### 6. कर्मत्वपक्षे आपत्ति: - सूत्रस्य असङ्गति:

पाणिनिना 'कर्मणि द्वितीया' इदमेव सूत्रं कृतं न तावत् 'कर्मत्वे द्वितीया' अत: कर्मवाचिका द्वितीया इत्येवमर्थ: स्यात्।

### 7. समाधानम् - मात्राया: न्यूनता

'कर्मत्वे द्वितीया' इति सूत्रस्य प्रणयने तकार-वकार-एकाराणां मात्रात्रयं भवति। तथा च 'कर्मणि द्वितीया' इति सूत्रस्य प्रणयने णकार-इकारयो: मात्रा सार्धैकं भवति। अर्थात् 'कर्मणि द्वितीया' इति सूत्रस्य प्रणयने एव सार्धैकमात्राया: लाघवं विद्यते[19]। वैयाकरणकुले प्रसिद्धोक्तिस्तावत् ''अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणा:'' इति। तथा च 'कर्मणि द्वितीया' इति सूत्रस्थ कर्मणिपदं धर्मपरत्वात् स्वीकरणेनैव कार्यनिर्वाह: भवितुं शक्यते। अत: 'कर्मणि द्वितीया' इत्येवं सूत्रमुचितम्।

### 8. कर्मपक्षे आपत्ति: - नामार्थप्रत्ययार्थयोरभेदान्वयबोधापत्ति:

'चैत्र: ग्रामं गच्छति' इत्यत्र चैत्रप्रातिपदिकेन चैत्रव्यक्तिरूपपदार्थस्योपस्थिति:, 'सु' इति प्रत्ययेन एकत्वसंख्याया उपस्थिति:, ग्रामप्रातिपदिकेन ग्रामपदार्थस्योपस्थिति:, 'अम्' इति प्रत्ययेन कर्मण उपस्थिति: स्यात्, गम् धातुना व्यापारस्योपस्थिति:, तिप् प्रत्येन कृतिकालयोरुपस्थिति: भवति।

ग्रामप्रातिपदिकेन उपस्थापित: ग्रामपदार्थ:, 'अम्' इति प्रत्ययेन उपस्थापित: कर्मण:, अनयोर्ग्रामकर्मणोर्मध्येऽभेदान्वय: स्यात्। यतो ह्यस्मिन् वाक्ये ग्राम एव कर्म। परञ्च अभेदान्वयबोधस्तु नामार्थनामार्थयोरेव भवतीति प्रसिद्धनियम:[20]।

### 9. कत्वर्मपक्षे - नामार्थप्रत्ययार्थयोरभेदान्वयबोधापत्तेरभाव:

कर्मत्वपक्षे तु ग्राममित्यत्र प्रकृत्यात्मक'ग्राम'नामार्थस्तावत् 'ग्राम:', द्वितीयाविभक्त्यात्मकप्रत्ययार्थस्तावत् 'कर्मत्वम्' तच्च कर्मत्वं संयोगरूपमत्र तेन ग्राम-संयोगयोपदार्थयोर्मध्ये वृत्तित्वसंबन्धेन ग्रामवृत्तिसंयोगरित्यन्वयबोध:। स च

---

8 पाणिन्याष्टाध्यायी, सूत्रसंख्या 02/03/36.

9 वार्तिकसंख्या 160.

10 पाणिन्याष्टाध्यायी, सूत्रसंख्या 01/04/38.

11 पाणिन्याष्टाध्यायी, सूत्रसंख्या 02/03/04.

12 A. 'षष्ठ्यपवादो योग:', काशिका-02/03/04.
B. सिद्धान्तकौमुदीकारकप्रकरणम्, राजकिशोरमणि:, पृ. 80.

13 पाणिन्याष्टाध्यायी, सूत्रसंख्या 01/04/46.

14 नैयायिका: 'शक्तं पदम्' तथा च वैयाकरणा 'सुप्तिङन्तं पदम्' अङ्गीकुर्वन्ति,

15 व्युत्पत्तिवाद:, दीपिकाव्याख्या, पृ. 241.

16 श्लोकसंख्या 17, पृ. 27, धीवर्ग:, अमरकोशः

17 व्युत्पत्तिवाद:, आदर्शव्याख्या, पृ. 283.

18 व्युत्पत्तिवाद:, शास्त्रार्थकलाव्याख्या, पृ. 205.

19 व्युत्पत्तिवाद:, गूढार्थतत्त्वालोकव्याख्या, पृ. 113.

20 व्युत्पत्तिवाद:, ताताचार्य:, पृ. 202.

वृत्तित्वसंबन्धः भेदसंबन्धः। अतः कर्मत्वपक्षे 'अभेदान्वयबोधस्तु नामार्थनामार्थयोरेव' इति नियमस्य तथाविधान्वयदोषः नास्तीति भावः।

### 10. कर्मपक्षे आपत्तिः- पदार्थान्वययानुपपत्तिदोषः

'चैत्रः ग्रामं गच्छति' इत्यत्र ग्रामप्रातिपदिकेनोपस्थापितः 'ग्रामपदार्थः', 'अम्' इति प्रत्ययेन उपस्थापितः 'कर्म' अनयोर्मध्ये अभेदान्वयः स्यात्, तेन कर्मणः जनकत्वसंबन्धेन धात्वर्थव्यापारेऽन्वयोऽसम्भवः योग्यताभावात्। यतोहि 'गम्' धातूपात्तव्यापारः ग्रामचैत्रयोर्मध्ये संयोगस्य जनने समर्थो विद्यते न तु तावत् ग्रामरूपकर्मणः जनने समर्थः।

### 10.1. कर्मपक्षे पदार्थान्वययानुपपत्तेः समाधानम्

ग्रामरूपकर्मणः 'स्ववृत्तिफलजनकत्वसंबन्धेन' 'गम्' धात्वर्थव्यापारे अन्वये न क्षतिः। स्वं कर्म, तद्वृत्ति कर्मत्वं तच्च संयोगादिफलं तस्य जनकः गम् धात्वर्थव्यापारः। अतोऽधुना कर्मपक्षे पदार्थान्वययानुपपत्तिदोषः नावशिष्यते।

### 10.2. कर्मपक्षे समाधानाक्षेपः (स्ववृत्तिजनकत्वसंबन्धः गौरवदोषग्रस्तः)

"साक्षात्संबन्धेनान्वये संभवति चेत् परम्परया संबन्धेनान्वये गौरवम्" एषः खलु नियमः पदार्थान्वयस्य। कर्मणः स्ववृत्तिसंबन्धेन कर्मत्वे तस्य च जनकत्वसंबन्धेन धात्वर्थव्यापारे अन्वयः, अस्यापेक्षया सूत्रस्थ'कर्म'शब्दस्य 'कर्मत्वे' तात्पर्यं स्वीकुर्यात्तेन कर्मत्वस्य (संयोगस्य) साक्षात् जनकत्वसंबन्धेन धात्वर्थव्यापारे अन्वये लघुता स्यात्। कर्मपक्षे 'स्ववृत्तिः' अस्यांशस्य अधिकतया भाने गौरवदोषः समुपस्थितो भवति।

जयाव्याख्याकारः जयदेवः फलव्यापारयोर्धात्वर्थपक्षे भिन्नतया गौरवदोषं प्रदर्शयति तद्यथा द्वितीयाविभक्तेरर्थं कर्मस्वीकारे ग्रामवृत्तिसंयोगानुकूलत्वसंबन्धेन कर्मणः संयोगावच्छिन्नव्यापारेऽन्वये सति संयोगस्य द्विधाभानं गौरवममिति[21]।

### 11. कर्मत्वस्य स्वरूपम्

कर्मत्वं न तावदखण्डोऽपाधि[22]रूपमतः गदाधरभट्टाचार्यः कर्मत्वस्वरूपं कथयन्नाह "कर्मत्वं च क्रियाजन्यफलशालित्वम्"। अत्र 'च' शब्दः त्वर्थे विद्यते[23]। कर्मत्वलक्षणे क्रियाजन्यफलशालित्वे यः क्रियापदार्थः सः धातुत एव लभ्यते। अतः धातुजन्यफलशालित्वमिति फलितार्थः। धातोः तथा च धातुजन्यफलमध्ये जन्यजनकभावसंबन्धो भवति। सः च जन्यजनकभावसंबन्धः संसर्गमर्यादया (आकांक्षया) प्रतीयते। परिशेषात् संयोगादिरूपं फलमात्रमेव कर्मप्रत्ययस्य द्वितीयादेरर्थः।

व्युत्पत्तिवादस्य दीपिकाव्याख्याकारः शिवदत्तमिश्रः कर्मत्वलक्षणे निगदति यत् "कर्मत्वं च क्रियाजन्यफलशालित्वं" इदं कर्मत्वस्य लक्षणं तावत् धातोर्व्यापारमात्रे शाक्तिरित्यभिप्रायेण विलिखितं। फलावच्छिन्नव्यापारे धातोर्शक्तिपक्षे तावत् "धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वम्" इति कर्मत्वस्य लक्षणम्[24]।

'चैत्रः ग्रामं गच्छति' इत्यादौ द्वितीयाविभक्तेः संयोगरूपफलमर्थः। अत्र संयोगे आधेयतासंबन्धेन प्रकृत्यर्थस्य ग्रामस्यान्वयः। संयोगस्य जनकतासंबन्धेन धात्वर्थक्रियायामन्वयः। धात्वर्थक्रियायाः अनुकूलत्वसंबन्धेन आख्यातार्थकृतावान्वयः। कृतेः समवायसंसर्गेण आश्रयतासंसर्गेण वा चैत्रेऽन्वयस्तेन 'चैत्रः ग्रामं गच्छति' इति वाक्यस्य 'ग्रामनिष्ठसंयोगजनकक्रियानुकूलकृत्याश्रयश्चैत्रः' इति बोधो जायते। स च बोधश्शाब्दबोधनाम्ना विज्ञायते।

'चैत्रः ग्रामं त्यजति' इत्यादौ द्वितीयाविभक्तेः वियोगरूपफलमर्थः । अत्र वियोगे आधेयतासंबन्धेन प्रकृत्यर्थस्य ग्रामस्यान्वयः। वियोगस्य च जनकतासंबन्धेन धात्वर्थक्रियायामन्वयः। धात्वर्थक्रियायाः अनुकूलत्वसंबन्धेन आख्यातार्थकृतावान्वयः। कृतेः समवायसंसर्गेण आश्रयतासंसर्गेण वा चैत्रेऽन्वयस्तेन 'चैत्रः ग्रामं त्यजति' इति वाक्यस्य 'ग्रामनिष्ठवियोगजनकक्रियानुकूलकृत्याश्रयश्चैत्रः' इति बोधो जायते।

'अनन्यलब्धो हि शब्दार्थः' इति न्यायः। अर्थात् यस्यार्थस्योपस्थितिः न तावदन्येन शब्देन भवति सैव तद्शब्दवाच्यं भवति। प्रकृतस्थले अन्येषां सर्वेषामर्थानामुपस्थितिरन्येन शब्देन जायते मात्रं संयोगवियोगादिफलानामुपस्थितिः द्वितीयाविभक्तिं परित्यज्य न केनापि शब्देन जायते। अतः द्वितीयाविभक्तेरर्थं संयोगवियोगादिरूपं फलं कर्मत्वमेव। न चाश्रयत्वं द्वितीयाविभक्तेरर्थः, तस्य संसर्गमर्यादया भास्यमानत्वेन ग्रहणादिति[25]।

संयोगत्वविभागत्वादिरूपशक्यतावच्छेदकभेदात् शक्त्यानन्त्यं प्रसजतीति कर्मत्वमखण्डोपाधिरित्येव युक्तमिति शङ्कां परिहरन्नाह विद्वन्मनोरमाकारः ताताचार्यः- आश्रयतासंबन्धेन फलमेव कर्मत्वमिति पर्यवसानात् अनन्तानां फलरूपाणां कर्मत्वानां शक्यानां कर्मतात्वेन शक्यतावच्छेदकेन एकेनानुगमात् शक्त्यानन्त्यं नास्तीति लाघवम्[26]।

फलं परिभाषयन्नाह विद्वन्मनोरमाकारः ताताचार्यः "फलत्वञ्च धात्वर्थव्यापारे विशेषणतया भासमानत्वे सति धात्वर्थजन्यत्वम्"[27]। धात्वर्थजन्यत्वमिति विशेष्यदलं किमर्थमित्याह 'मन्दं गच्छति' द्रुतं गच्छति, इत्यादि स्थले मन्दादेरन्वयरभेदेन धात्वर्थव्यापारे भवति परञ्च मन्दादिः न तावत् धात्वर्थजन्यमतः 'मन्दं गच्छति' द्रुतं गच्छति' इत्यादिस्थले अतिव्याप्तिवारणाय फललक्षणे 'धात्वर्थजन्यत्वम्' दलं प्रदत्तम्। फललक्षणे 'धात्वर्थव्यापारे विशेषणमि'ति विशेषणदलं किमर्थमित्याह 'देवदत्तः प्रयागात् काशीं गच्छति' इत्यादिस्थले प्रयागनिष्ठवियोगः तावत् गमिधात्वर्थव्यापारजन्यः, परञ्च प्रयागनिष्ठवियोगस्यान्वयः गमिधात्वर्थव्यापारे न भवति। अर्थात् प्रयागनिष्ठवियोगः न तावत् गमिधात्वर्थव्यापारस्य विशेषणम्। अतः 'देवदत्तः प्रयागात् काशीं गच्छति' इत्यादिस्थले 'प्रयागस्य' कर्मसंज्ञारूपातिव्याप्तिवारणाय फललक्षणे 'धात्वर्थव्यापारे विशेषणमि'ति विशेषणदलं प्रदत्तम्।

गदाधरभट्टाचार्यरण प्रदत्ते कर्मत्वस्य लक्षणे फलशालित्वं कीदृशं ग्राह्यमित्याह विद्वन्मनोरमाकारः ताताचार्यः "स्वाश्रयत्वस्वनिष्ठप्रकृतक्रियाकर्तृसमवेतेच्छीयप्रकारतानिरूपतिविशेषणत्वान्यतरसंबन्धेन फलशालित्वम्[28]" ग्राह्यम्। एतेन 'काशीं गच्छन् पथि मृतः' इत्यादिस्थले 'काशीं' इत्रत्र न कर्मत्वस्यानुपत्तिः।

---

21 व्युत्पातिवादः, जयाव्याख्या, पृ. 184.

22 व्युत्पत्तिवादः, ताताचार्यः, पृ. 202.

23 व्युत्पत्तिवादः, सुनन्दाव्याख्या, पृ. 284.

24 व्युत्पातिवादः, दीपिकाव्याख्या, पृ. 243.

25 व्युत्पातिवादः, जयाव्याख्या, पृ. 184.

26 व्युत्पत्तिवादः, ताताचार्यः, पृ. 202.

27 व्युत्पत्तिवादः, ताताचार्यः, पृ. 202.

28 व्युत्पत्तिवादः, ताताचार्यः, पृ. 203.

### 12. निष्कर्ष: -

'कर्मणि द्वितीया' इत्यत्र कर्मपदेन कर्मण: बोधे नामार्थप्रत्ययार्थयोरभेदान्वयबोधापत्तिः, पदार्थान्वयानुपपत्तिनामकौ दोषौ विद्येते। परञ्च यदि 'कर्म'पदेन 'कर्मत्व'स्य ग्रहणं स्वीकुर्मश्चेत्तदा पूर्वोक्तदोषयोरभावो भवति। अतोऽत्र कर्मपदेन कर्मत्वस्यैव ग्रहणम्। कर्मत्वञ्च तावत् संयोगवियोगादिफलस्वरूपमेव भवति। एतस्माद्धेतो: द्वितीयाविभक्तिवाच्यं 'फलम्' अङ्गीकुर्वन्तीति प्राच्यनैयायिकानामाशय:।

### 13. सन्दर्भसहायकग्रन्थनां नामावलि:

1. Bhatt, V. P. Navya Nyaya Theory of Verbal Cognition (Critical Study of Gadadhar Bhattacharya's Vyutpattivada). 01-02, Deccan College, Poona, First Edition, 1996 ....6 Eddition, 1996.rparation, Delhifirst . Eastern Book linkers, Delhi, Second Edition, 1990. Third Edition, 2001.

2. व्युत्पत्तिवाद (जयदेव मिश्र कृत जया संस्कृत टीका सहित), मिश्र, उमेश चन्द (सम्पादक). इलाहाबाद, 1988

3. कीर्त्यानन्द: (सम्पादक:). व्युत्पत्तिवाद*:* (गूथार्थतत्त्वालोक-संस्कृतटीकासहित:), चौखम्बा-अमर-भारति-प्रकाशनम्, वाराणसी, 1976.

4. व्युत्पत्तिवाद (वेणीमाधव शुक्ल कृत शास्त्रार्थकला संस्कृत टीका सहित), काशी संस्कृत ग्रन्थमाला (115), चौखम्बा संस्कृत संस्थान, वाराणसी, तृतीय संस्करण, 1968. पुनर्मुद्रित, 2007.

5. गौड, ज्वालाप्रसाद (सम्पादक). *व्युत्पत्तिवाद* (शिवदत्त मिस्र कृत दीपिका संस्कृत टीका सहित), चौखम्बा सुरभारती ग्रन्थमाला (66), चौखम्बा सुरभारती प्रकाशन वाराणसी, द्वितीय संस्करण, 1983. पुनर्मुद्रित, 2010.

6. चतुर्वेदी, गिरिधरशर्मा परमेश्वरानन्द: & भास्कर:, वैयाकरणसिद्धान्तकौमुदी (वासुदेव-दीक्षितकृता बालमनोरमा एवं ज्ञानेन्द्रसरस्वतीकृता तत्त्वबोधिनी-संस्कृतव्याख्यासहित:), खण्डानि 01-04, मोतीलाल-बनारसीदास:, दिल्ली, 1958-61.

7. त्रिपाठी, हरेराम: (सम्पादक:). व्युत्पत्तिवाद*:* (सुदर्शनाचार्यकृता आदर्शसंस्कृतटीकासहित:), राष्ट्रिय-संस्कृत-संस्थानम्, नवदेहली, प्रथमं संस्करणम्, 2011.

8. दास:, अच्युतानन्द: (सम्पादक:), व्युत्पत्तिवाद*:* (कृष्णभट्टकृता कृष्णभट्टीया, धर्मदत्तकृता गूथार्थतत्त्वालोक:, सुदर्शनाचार्यकृता आदर्श:, जयदेवकृता जया, शिवदत्तकृता दीपिका, लक्ष्मीनाथकृता प्रकाश:, वेणीमाधवशुक्लकृता शास्त्रार्थकलासंस्कृतव्याख्यासहित:), न्यू भारतीय बुक कॉर्पोरेशन, दिल्ली, प्रथमं संस्करणम्, 2004.

9. मिश्र:, सच्चिदानन्द: (सम्पादक:), व्युत्पत्तिवाद*:* (सम्पादककृता सुनन्दाहिन्दीव्याख्यासहित:), भारतीयविद्याप्रकाशनम्, वाराणसी, प्रथमं संस्करणम्, 2001.

10. शास्त्री, भीमसेन: (सम्पादक:). लघुसिद्धान्तकौमुदी (सम्पादककृता भैमीहिन्दीव्याख्यासहित:)**,** दिल्ली, 1950-80.

11. सतपथी, हरेकृष्ण: (सम्पादक:), व्युत्पत्तिवाद*:* (एन्. एस्. रामानुज-ताताचार्यकृता विद्वन्मनोरमासंस्कृतटीकासहित:), राष्ट्रिय-संस्कृत-विद्यापीठम्, तिरुपति:, प्रथमं संस्करणम्, 2011.

12. अमरसिंह:, अमरकोश:, चौखम्बा-विद्याभवनम्, वाराणसी, 2015.